वराहहयवदनस्तोत्रम्

विदारितनिशाचरौ विशदवेदविद्याकरौ
प्रपन्नजनतावनौ प्रशिथिलीकृताश्वाननौ ।
मनोरमतमाकृती मदनमानिताधःकृती
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ १॥

वराभयदरारिभिर्वलयवल्गुहस्तद्युभिः
प्रबोधशुभपुस्तकप्रगुणशङ्खमाल्यैर्युतौ ।
हरिन्मणिमणिद्युती हरवितायमानस्तुती
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ २॥

मनोज्ञपदसारसौ महितजानुमध्योरसौ
त्रिरेखशुभकन्धरौ त्रिजगदादृतश्रीकरौ ।
विभूषणगणाश्रयौ विमलहारमालाश्रयौ
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ ३॥

रसामृतरसाङ्कितौ रसिकभक्तवर्गाञ्चितौ
प्रसादभरितेक्षणौ प्रमथमण्डलीशिक्षणौ ।
विरुद्धधुरसङ्गरौ महितशक्तितोऽभंगुरौ
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ ४॥

सुखानुभवविग्रहौ सुजनसङ्गरक्षाग्रहौ
विनोदजितदानवौ विलसदाकृतीं श्रीनवौ ।
भवाब्धिभयभञ्जनौ निजपदं सदा ध्यायिनां
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ ५॥

वराहतुरगास्ययोर्वरनुतिं निजैर्वश्ययोः
कृपानिलयनेत्रयोः कृपणभक्तहृन्मित्रयोः ।
यतिः शमलशान्तये यमिविमृग्यहृद्वान्तये
व्यधत्त विलसत्पदां विमलवादिराजाभिधः ॥ ६ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीवराहहयवदनस्तोत्रं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु